श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीशङ्कराचार्य विरचितम्

# ॥ मातृपञ्चकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ मातृपञ्चकम् ॥

आस्तां तावदियं प्रसूतिसमये दुर्वारशूलव्यथा
नैरुच्यं तनुशोषणं मलमयी शय्या च सांवत्सरी।
एकस्यापि न गर्भभारभरणक्लेशस्य यस्य क्षमो
दातुं निष्कृतिमुन्नतोऽपि तनयः तस्यै जनन्यै नमः ॥ 1 ॥

गुरुकुलमुपसृत्य स्वप्नकाले तु दृष्ट्वा
यतिसमुचितवेषं प्रारुदो मां त्वमुच्चैः।
गुरुकुलमथ सर्वं प्रारुदत्ते समक्षं
सपदि चरणयोस्ते मातरस्तु प्रणामः ॥ 2 ॥

न दत्तं मातस्ते मरणसमये तोयमपि वा
स्वधा वा नो दत्ता मरणदिवसे श्राद्धविधिना।
न जप्तो मातस्ते मरणसमये तारकमनुः
अकाले संप्राप्ते मयि कुरु दयां मातरतुलाम् ॥ 3 ॥

मुक्तामणिस्त्वं नयनं ममेति राजेति जीवेति चिरं सुत त्वम्।
इत्युक्तवत्यास्तव वाचि मातः ददाम्यहं तण्डुलमेष शुष्कम् ॥ 4 ॥

अम्बेति तातेति शिवेति तस्मिन् प्रसूतिकाले यदवोच उच्चैः।
कृष्णेति गोविन्द हरे मुकुन्देत्यहो जनन्यै रचितोऽयमञ्जलिः ॥ 5 ॥

॥ इति मातृपञ्चकम् समाप्तम् ॥